# Turaga Shatakam

# તુરગશતકમ્

## Document Information

Text title : Turaga Shatakam

File name : turagashatakam.itx

Category : vishhnu, shataka

Location : doc_vishhnu

Author : shrIkuTTikaviM

Proofread by : Rajesh Thyagarajan

Description/comments : From Stotrasamuchchaya 2, Edited by Pandit K. Parameshwara Aithal

Latest update : May 10, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 31, 2023

*sanskritdocuments.org*

# તુરગશતકમ્

ચલત્પ્રોથપ્રાન્તં ચટુનટદુદગ્રાગ્રચરણં
    મુહુર્હુઙ્કારાગ્ચન્મુખગલિતફેનસ્તબકિતમ્ ।
ખલીનાભુગ્નાસ્યં ખમિવ નિગિલન્તં નિજજવાત્
    તુષારાદ્યુત્તુઙ્ગં તુરગવરમારોહતિ હરિઃ ॥ ૧॥

અથ કથમપિ સોઢું રઙ્ગનાથસ્ય રિઙ્ખત્-
    તુરખુરનિપાતાનક્ષમેવ ક્ષમેયમ્ ।
અવિરલબહુલોદ્યન્માંસલોત્તાલધૂલી-
    પટલકપટતઃ ખં લક્ષ્યતે ધાવમાના ॥ ૨॥

વિચરતિ પરિવીથિ રઙ્ગનાથે હયમધિરુહ્ય ખુરક્ષતાવનીકમ્ ।
સપદિ વિયદવેક્ષ્ય રેણુસાન્દ્રં ચકિતમનોભિરભાવિ ચક્રવાકૈઃ ॥ ૩॥

પટુતરખુરકોટિક્ષુણ્ણપૃથ્વીતલોદ્યત્-
    પ્રસૃમરઘનરેણુવ્યાપ્તરોદોઽન્તરાલમ્ ।
હયવરમધિરૂઢો વીક્ષતે વક્ષસિ દ્રાગ્
    જનકવિલયભીતામઙ્ગનાં રઙ્ગનાથઃ ॥ ૪॥

સ્વામિન્ રઙ્ગવિભો જગત્ત્રયપરિત્રાણાય બદ્ધાદર
    બ્રૂમઃ કિં ભુવનસ્વતન્ત્ર ભક્તો લીલાવિહારક્રમમ્ ।
ધાટીકૌતુકિનિ ત્વયિ શ્રિતવતિ ત્વઙ્ગત્તુરઙ્ગોત્તમં
    વ્યોમ ક્ષ્માતલતાં દધાતિ રજસા ક્ષુણ્ણા ક્ષિતિર્વ્યોઽમતામ્ ॥ ૫॥

ત્વદ્ધાટીપટુઘોટનિષ્ઠુરખુરપ્રત્યગ્રટઙ્કત્રુટત્-
    પૃથ્વીનિર્યદવાર્યરેણુપટલે દ્રાગુજ્જિહાને દિવમ્ ।
સ્ત્રૈણં સર્વસુપર્વણાં ઘટગતં મન્દાકિનીયં પયઃ
    કૃચ્છ્રાદચ્છયિતું ચિરાય કતકક્ષોદેષુ સન્નયતિ ॥ ૬॥

ત્વઙ્ગત્તુઙ્ગતુરઙ્ગનિષ્ઠુરખુરક્ષુણ્ણક્ષમામણ્ડલી-

ધૂલીભિર્ભુવનોદરં સ્થગયતિ શ્રીરઙ્ગનાથ ત્વયિ ।
બાધિર્યં ભુજગાધિપઃ સુરપતિસ્ત્વાન્ધ્યં રવિઃ પઙ્ગુતાં
મૂકત્વં જલધિઃ પ્રયાતિ ભગવન્ કો ન્વેપ લીલાક્રમઃ ॥ ૭॥

રઙ્ગેશે સહસાધિતિષ્ઠતિ જવં તુઙ્ગં તુરઙ્ગોત્તમ
ધૂલીપાલિષુ જૃમ્ભિતાસુ પરિતોઽપ્યન્યત્ કિમચક્ષ્મહે ।
નદ્યો બિભ્યતિ લજ્જતે વસુમતી પદ્મા પરં ખિદ્યતે
શમ્ભુઃ કુપ્યતિ ચ પ્રયાતિ વરુણો વસ્તું ચ વાસ્ત્વન્તરમ્ ॥ ૮॥

રઙ્ગેશતુઙ્ગતુરગોદિતરેણુવૃન્દૈ-
ર્મન્દાકિનીપયસિ પઙ્કિલતાં દધાને ।
તત્સમ્ભવાનિ કમલાન્યપિ પઙ્કજાખ્યાં
મન્યે ચિરાય દધતે કિલ યોગરૂઢામ્ ॥ ૯॥

પુર્યામદ્ભુતભોગસીમ્નિ ભવતો રઙ્ગપ્રભો વાસિનાં
દેવાનામવિરૂપવૈભવગુણૈઃ કિઞ્ચિન્ન વીક્ષેઽન્તરમ્ ।
દેવા નૈવ મહીં સ્પૃશન્તિ પુનરિત્યેકો વિશેષો યદિ
ત્વદ્ધાટીતુરગોત્થરેણુનિબિડસ્વર્વાસિનસ્તેઽપ્યહો ॥ ૧૦॥

રઙ્ગેશસ્ય વિહારસીમસુ વલજ્જઙ્ઘાલતુઙ્ગાશ્વરાડ્-
વેગોદગ્રખુરાગ્રચૂર્ણિતધરા ધૂલીકદમ્બેડમ્બરે ।
સન્ધ્યાભ્રભ્રમતઃ સચન્દ્રકશિખૌ ચઞ્ચત્કલાપાઞ્ચિતૌ
સોત્કણ્ઠં કિલ તાણ્ડવં કલયતો દ્રાઙ્નીલકણ્ઠૌ ક્ષણમ્ ॥ ૧૧॥

શ્રીરઙ્ગેશતુરઙ્ગમસ્ય મહતો ધાટ્યારભટ્યુચ્ચલત્-
પાદાઘાતમહાજવાર્તિમતુલાં પ્રાપ્તા ધરામણ્ડલી ।
આપાતાલનિપાતખાતવિવરપ્રોદ્યત્ફણિગ્રામણી-
રત્નશ્રેણિરુચાં ભરૈઃ સરુધિરસ્યન્દેવ સન્દૃશ્યતે ॥ ૧૨॥

હેષાભિર્બધિરીકૃતત્રિભુવનં પાદાગ્રવજ્રાહતિ-
પ્રોડ્ડીનક્ષિતિમણ્ડલં હયવરં દેવે સમારોહતિ ।
અધોદ્ગ્રીવિકયા ચિરાદ્ વિદધતે દિક્કુમ્ભિકુમ્ભીનસ-
ગ્રામણ્યાદિમપોત્રિકૂર્મપતયો વિશ્રાન્તિતઃ ફૂત્કૃતિમ્ ॥ ૧૩॥

આપાતાલતલાદહીશ્વરશિરોરત્નાંશુનીરાજિતા-
દા વિધ્યણ્ડકરણ્ડભિત્તિશિખરાદચ્છામ્બુસમ્પ્લાવિતાત્ ।
રાકાકાશમયાન્યશેષભુવનાન્યન્તર્ધિનિર્ભેદનાત્

સદ્યઃ કર્તુમના ઇવાદ્ય તુરગો નિર્યાતિ રઙ્ગેશિતુઃ ॥ ૧૪॥

રુદ્ધા દિગ્વલભીર્જગત્ત્રયમભિવ્યાપ્યોર્ધ્વમુજ્જૃમ્ભિતે
રઙ્ગેશસ્ય તુરઙ્ગધાવનસમુદ્ભૂતે રજોમણ્ડલે ।
આબધ્નન્ સનકાદયો મુનિગણાઃ પુસ્તાન્યદૃષ્ટાક્ષરા-
ણ્યાધુન્વન્નુદતિષ્ઠદાત્તકલશઃ સ્વીયાં બ્રસીમબ્જભૂઃ ॥ ૧૫॥

રંહઃસંહૃતતાર્ક્ષ્યમારુતમનોગર્વેઽશ્વરત્ને સુખં
સ્થિત્વા ખેલતિ રઙ્ગધામનિ વિભૌ ક્ષોણી સમાલક્ષ્યતે ।
હેષાઘોષવિશેષજર્ઝરજરદ્બ્રહ્માણ્ડખણ્ડં જવા-
દુચ્ચૈર્ધર્તુમુદસ્તહસ્તયુગલેવોત્તાલધૂલીમિષાત્ ॥ ૧૬॥

ધાટીમાટી કમાને દૃઢધરણિહતિપ્રૌઢવાહાધિરૂઢે
રઙ્ગેન્દ્રે સાન્દ્રસાન્દ્રં વિયતિ વિસૃમરાપારપાંસુચ્છટાનામ્ ।
સેવાહેવાકદેવાવલિબલિનિબિડોદસ્તકલ્પપ્રસૂન-
સ્રસ્તસ્ફાયત્પરાગૈઃ ક્ષણમજનિ કિલાન્યોન્યસઙ્ઘર્ષયોગઃ ॥ ૧૭॥

શ્રીરઙ્ગેશ્વર તાવકાશ્વચરણન્યાસાહતોર્વીતલ-
પ્રોદ્યન્માંસલપાંસુબન્ધનિબિડં વીક્ષ્યાન્તરિક્ષં ક્ષણમ્ ।
વપ્રાઘાતકૃતાગ્રહં નિયમયત્યાલગ્નકુમ્ભં વલ-
ચ્છુણ્ડામણ્ડલમઙ્કુશેન હિ નિજં વેતણ્ડમાખણ્ડલઃ ॥ ૧૮॥

રિઙ્ખત્તુઙ્ગતુરઙ્ગવઙ્ગિવપુષો ધાટીષુ રઙ્ગેશિતુ-
ર્નીરન્ધ્રોદ્ધતરેણુબન્ધનિબિડાભોગે નભઃપ્રાઙ્ગણે ।
સર્વસ્વર્વનિતાવિમુક્તસુમનોમાધ્વીકજમ્બાલિતે
મન્દં વાહયતે રથં દિનપતેર્મગ્નપ્રથિં સારથિઃ ॥ ૧૯॥

વિહૃતિપરાન્તરઙ્ગવતિ રઙ્ગપતૌ ભુવને
ચતુરતુરઙ્ગચઙ્ક્રમણમત્ર તરઙ્ગયતિ ।
અજનિ રસાતલં બત રસા તરસા વિયદ-
પ્યવનિતટીસમસ્થિતિમટીકત રેણુભરૈઃ ॥ ૨૦॥

ધાટીજાતકુતૂહલાકુલધિયઃ શ્રીરઙ્ગધામ્નઃ પ્રભો-
રુદ્યદ્બન્ધુરગન્ધસૈન્ધવખુરાઘાતક્ષતૈરઙ્કિતા ।
આક્રન્દાય વસુન્ધરાદ્ય નિતરામારં કુમારં નિજં
દ્રષ્ટું નિર્ભરપાંસુબન્ધમિષતો નૂનં દિવં ધાવતિ ॥ ૨૧॥

ચતુરતુરગારૂઢં ત્રૈલોક્યમોહનમાત્મનો
    રમણમવની દૃષ્ટ્વા દૃષ્ટ્વાદ્ય રઙ્ગમહીપતિમ્ ।
પ્રતિકલમપિ પ્રોદ્દામોદ્યત્પરાગભરચ્છલા-
    દજનિ વિપુલાનન્દાદાપૂર્યમાણતનૂરિવ ॥ ૨૨॥

ધાટીષુ રઙ્ગપતિના પટુ ધાવિતસ્ય વાહોત્તમસ્ય ખુરજૃમ્ભિતધૂલિપાલિઃ ।
રઙ્ગસ્થલીનટનકૌતુકિમુક્તિનટ્યા નેપથ્યકલ્પિતતિરસ્કરિણીવ ભાતિ ॥ ૨૩॥

અધ્યમ્ભોનિધ્યમન્દભ્રમણખગપતિવ્યાકુલાહીશ્વરાણિ
    ક્ષુત્ક્ષામક્રન્દદાશાકરટિમધુકરાણ્યુત્પિપાસાપરાણિ ।
પ્રમ્લાનામ્ભોરુહાણિ દ્રુતગતિતુરગારોહિણો રઙ્ગભર્તુ-
    ર્ધાટીકાલે જયન્તિ ક્ષિતિજનિતરજોમણ્ડલોજ્જૃમ્ભિતાનિ ॥ ૨૪॥

આરૂઢસ્તુરગં હરિર્વસુમતીચૂર્ણીકૃતિપ્રક્રિયા-
    વિક્રાન્તં શયનાલયસ્ય સહસાશાસ્તે શિવં ચેતસા ।
ગૌષ્ઠીનસ્ય મહાનસસ્ય વિલયત્રસ્તે સુરાણાં ગણે
    ગઙ્ગા પ્રાર્થયતે ચ કર્ણગતયોસ્તાટઙ્કયોર્મઙ્ગલમ્ ॥ ૨૫॥

દિઙ્મણ્ડલીમથ નભશ્ચ સચન્દ્રસૂર્ય
    હન્ત ક્ષણાત્ કબલયન્નિવ રઙ્ગભર્તુઃ ।
ધાટીષુ સત્વરતુરઙ્ગરજઃ સમૂહઃ
    પાતું ચ સપ્તજલધીનુપધાવતીવ ॥ ૨૬॥

ધાટીધાવિતરઙ્ગરાજતુરગવ્યાધૂતધૂલીભરૈઃ
    સાન્દ્રે મન્દરુચિઃ પ્રદીપતિ રવિઃ સૌવર્ગમાર્ગાન્તરે ।
કિં ચોદઞ્ચિતકૌતુકં વિચરતાં વૈમાનિકાનાં રથા
    વિદ્યોતૈઃ ક્ષણદર્શિતૈર્વિદધતે ખદ્યોતલીલાયિતમ્ ॥ ૨૭॥

રઙ્ગેશસ્ય હિ ગર્વપર્વતચરત્ખર્વેતરાર્વાધિપ-
    પ્રેઙ્ખત્તિગ્મખુરાગ્રવિષ્ટધરણીપાંસુચ્છટાબન્ધુરે ।
દૃશ્યન્તે ગગનાઙ્ગણેઽદ્ય પરિતો નક્ષત્રતારાગ્રહાઃ
    પ્રત્યગ્રપ્રવિકીર્ણતદ્ધનયશોબીજપ્રરોહા ઇવ ॥ ૨૮॥

હરનગરુચિલેશસ્તેયમાધાય સોઽયં
    ભુવનમખિલમુચ્ચૈર્ભાસયન્ ભ્રામ્યતીવ ।
તુરગખુરજધૂલીપાલિરભ્યુજ્જિહીતે
    ગ્રસિતુમિવ સરોષં મણ્ડલં ચણ્ડમાનોઃ ॥ ૨૯॥

આલોક્યતે તુરગરેણુકદમ્બલક્ષ્યા
    ત્રૈલોક્યમપ્યભિવિગાહ્ય વિજૃમ્ભમાણા ।
પાદત્રયીમિતજગત્ત્રયમાત્મનાથં
    પ્રાયોऽનુકર્તુમભિલાષવતીવ પૃથ્વી ॥ ૩૦॥

સન્દૃશ્યતે તુરગવાહનસાદરસ્ય રઙ્ગેશિતુસ્તુરગજૃમ્ભિતધૂલિપાલિઃ ।
સેવાજુષાં ભગવતો દયયાધિરોઢું સોપાનપદ્ધતિરિવ ત્રિદિવસ્ય બદ્ધા ॥ ૩૧॥

ધાટીષુ રઙ્ગાધિપતેર્ધરિત્રી રજસ્વલાભૂન્મલિનામ્બરા ચ ।
મન્યે તતઃ પાંસુકદમ્બદમ્ભાન્મન્દાકિનીં સ્નાતુમભિપ્રયાતિ ॥ ૩૨॥

તુરગખુરવિધૂતધૂલિપાલી નિબિડતરા દિવિ રઙ્ગનાયકસ્ય ।
રવિકિરણનિવારણાય પૃથ્વ્યા વિધૃતમિવોપરિ વીક્ષ્યતે વિતાનમ્ ॥ ૩૩॥

નિર્માતુર્જગતાં ચરાચરગુરોર્દેવસ્ય સર્ગક્રમે
    પદ્ભ્યાં ભૂમિરભૂદિતિ શ્રુતિરિયં યુક્તાર્થમાહ ધ્રુવમ્ ।
રઙ્ગેશસ્ય તુરઙ્ગધૂલિમિષતઃ સંવ્યાપ્તલોકત્રયી
    શક્તિં કામપિ યેન કારણગુણાધીનાં વ્યનક્તિ ક્ષિતિઃ ॥ ૩૪॥

લોકાસેચનકાકૃતેર્ભગવતો વીથીષુ વીથીષુ ચ
    ક્રીડત્પ્રૌઢતુરઙ્ગચઙ્ક્રમકલાચાતુર્યમાલોકિતુમ્ ।
આયાતે દ્યુસદાં ગણે ધુતરજોવ્યૂહૌ વિધીન્દ્રૌ પરં
    હંસૈરાવણપક્ષકર્ણપવનૈઃ કૃચ્છ્રાદ્ ગતૌ સન્નિધિમ્ ॥ ૩૫॥

કૈલાસાચલતુઙ્ગશૃઙ્ગધવલસ્વાઙ્ગં તુરઙ્ગાધિપં
    પ્રત્યારુહ્ય સુરૂપધેયવિભવે રઙ્ગેશ્વરે ખેલતિ ।
ઊર્ધ્વોજ્જૃમ્ભિતસાન્દ્રરેણુવિહતાલોકાશ્ચિરં મેદિની-
    વાસાય સ્પૃહયન્તિ વાસવમુખા બર્હિર્મુખાનાં ગણાઃ ॥ ૩૬॥

દિવિ વિસૃમરશીલૈર્દેવદેવસ્ય ધાટી-
    ચલિતહયરજોભિશ્છાદિતે પદ્મબન્ધૌ ।
સપદિ કૃતનિરોધે સઙ્કુચન્નાભિપદ્મે
    મુખકમલમપશ્યન્મુહ્યતીવાબ્જયોનિઃ ॥ ૩૭॥

રઙ્ગેશસ્ય હિ ઘોટવર્તકસમુદ્ધતસ્ત્રિલોકાઙ્ગણા-
    ભોગોલ્લઙ્ઘનસાહસીપ્રચલિતો યઃ સાન્દ્રધૂલીભરઃ ।

તત્સન્દર્શનતર્ષહર્ષિદિવિષદ્ગન્ધર્વવિદ્યાધરા-
    મન્દાનન્દભરાશ્રુવૃષ્ટિભિરસૌ ખઞ્જોઽજનિષ્ટાઞ્જસા ॥ ૩૮॥

અવ્યાસુર્ભુવનત્રયીં ભગવતો દેવસ્ય રઙ્ગેશિતુ-
    ર્લીલાતુઙ્ગતુરઙ્ગરિઙ્ખણભવાઃ પુણ્યૌઃ પરાગોદ્ભવાઃ ।
પ્રત્યુદ્યત્કલિપઙ્કહારિકનકક્ષોદા વિમુક્ત્યઙ્ગના-
    પિષ્ટાતા ભવદુષ્ટભૂતસરયપ્રોચ્ચાટના ભૂતયઃ ॥ ૩૯॥

આભાતિ રઙ્ગપતિઘોટકફેનપુઞ્જ-
    સઞ્છન્નતત્ખુરપદાવલિમેદુરા ભૂઃ ।
ક્ષૌમેણ વલ્લભસમાગમસમ્ભૃતાનિ
    સંવૃણ્વતીવ કુટિલાનિ નખક્ષતાનિ ॥ ૪૦॥

ધાટીવેગાર્ભટીભિર્જિતવિહગપતિં કલ્યપલ્યાણભૂષં
વન્દે શ્રીરઙ્ગદેવાદ્ભુતપદકમલન્યાસધન્યં તુરઙ્ગં
સદ્યો યદ્વેગલેશં કમપિ કથયિતું હન્ત સોત્કણ્ઠકણ્ઠં
મૂકં વા લોહલં વા મુખરયતિ નરં કાપિ સાહિત્યધાટી ॥ ૪૧॥

કૂત્કુર્વત્ફણ્યધીશાન્યતિચલિતમહીભ્રાન્ત્યુદસ્તામ્બુધીનિ
    ક્રીડ્કુર્વદ્દિગ્ગજાન્યુદ્ભટખુરઘટનારુગ્ણતારાગ્રહાણિ ।
અત્યારબ્ધોગ્રવાક્યસ્ખલિતનિપતિતાકીર્ણવૈમાનિકાનિ
    શ્રીરઙ્ગેશસ્ય ધાટીચતુરગતુરગક્રીડિતાન્યુલ્લસન્તિ ॥ ૪૨॥

ધાટીવેગાર્ભટીભિર્નિશિતખુરપુટીગર્ભનિર્ભિન્નપૃથ્વી-
    જૃમ્ભદ્ગમ્ભીરધૂલીપટલવિલુલિતાર્કેન્દુબિમ્બે ત્વયિ દ્રાક્ ।
ત્વામારૂઢોઽદ્ય રઙ્ગો ભુવનપરિબૃઢઃ સત્વરોદિત્વરાણા-
    મક્ષીણાક્ષિવ્યધાનાં તુરગકુલપતેર્યાતિ દેવોઽપ્યુપઘ્નામ્ ॥ ૪૩॥

ધાટીસંરમ્ભસજ્જે હરિતુરગપતૌ મજ્જદુન્મજ્જદુર્વી-
    નિર્વાહાદક્ષચક્ષુઃશ્રુતિપતિકૃતફૂત્કારચણ્ડાનિલેન ।
તદ્ભારસ્ફારઘર્ષોદ્ગતચટુલતનૂપમ્યકૂર્માધિરાજ-
    શ્વાસૈઃ પાતાલલોકેઽજનિ પવનભુજામન્ધસામાશુ વૃદ્ધિઃ ॥ ૪૪॥

હેષાઘોષૈરશેષૈઃ ખુરપુટઘટિતક્ષ્માતટીટઙ્ક્રિયાભિ-
    ર્બન્ધૂરસ્કન્વભિત્તિસ્ખલિતમણિલસત્કિઙ્કિણીક્રેઙ્ક્રિયાભિઃ ।
ઘોરપ્રોદ્ગીર્ણઘોણાચુરુચુરિતરવૈઃ શાર્ઙ્ગિણો ભૂષશબ્દૈઃ
    શબ્દૈ કાદ્વૈતભાઞ્જિ વ્યતનિષત જગન્ત્યશ્વરત્નેન શશ્વત્ ॥ ૪૫॥

અગ્રે શ્રીરઙ્ગભર્તુઃ પ્રચલિતજનતોદ્ધૂતધૂલીકદમ્બૈઃ
શ્રીમૂર્ત્યાલોકસૌખ્યાનનુભવવિફલીભૂતનેત્રે જનૌઘે ।
અશ્વં શશ્વત્ સ્વવાલાનિલધુતરજસં સંશ્રિતસ્યાસ્ય પશ્ચાત્
સૌન્દર્યં વીક્ષ્ય કે ચિન્નયનસફલતાં મન્વતે નન્વતીવ ॥ ૪૬॥

વાહં વાહં હિ વાહં નિજજવવિજિતસ્યાનિલસ્યાભ્યુદેતિ
સ્પર્ધાલોર્માનસસ્યાત્મજ ઇતિ ચ રુચા સ્વચ્છફેનચ્છલેન ।
શ્રીરઙ્ગેશેન ધાટીકુતુકિતમનસા ધાવ્યમાનો મુદા દ્રા-
ગર્વાગર્વાતિગર્વાદ્ રજનિકરમસૌ સર્વતશ્ચર્વતીવ ॥ ૪૭॥

અચ્છૈર્માણિક્યગુચ્છૈઃ કલિતરવિમહઃ ખણ્ડનૈર્મણ્ડનૈર્વા
ઘોષૈઃ કલ્પાન્તપોષૈઃ સહિતમતિરજોધૂસરૈઃ કેસરૈશ્ચ ।
ઉચ્ચૈરાધાતુમુચ્ચૈઃશ્રવસિ પદમિવોદગ્રનમ્રાગ્રપાદં
પશ્યામ્યશ્વં વિનશ્યદ્વ્રજિનધનદૃશાં દૃશ્યમસ્યાદ્ય ॥ ૪૮॥

નવ્યં નવ્યં ચ નવ્યં સકલજનદૃશાં રૂપમાબિભ્રદશ્વો
હસ્તાબ્જન્યસ્તશક્તિં હરિમપિ ચ વહન્ સાદિવેષેઽપિ રમ્યમ્ ।
વીથીષ્વાધાવ્યમાનસ્તિમિતનિજશિરશ્ચામરશ્ચામરેડ્યો
ઽપ્યંહઃ સંહારકારી મમ ભવતુ પરં રંહસા સિંહસારઃ ॥ ૪૯॥

કલ્યાણાઞ્ચિતનૂત્નરત્નકલિકાવલ્યાવભુગ્નાનનઃ
કલ્યાઙ્ગો હરિસઙ્ગતો જલનિધીન્ કુલ્યા ઇવોલ્લઙ્ઘયન્ ।
કલ્યાવેગકૃતાનિ સજ્જનમનઃશલ્યાનિ સદ્યો હરન્
કલ્યાણં વિતનોતુ કલ્પિતમણીપલ્યાણરમ્યો હયઃ ॥ ૫૦॥

ઇતિ શ્રીકુટ્ટિકવિવિરચિતં તુરગશતકં અથવા ધાટીશતકં સમ્પૂર્ણમ્ ।
વાઞ્છેશ્વર અથવા વાઞ્છાનાથ અથવા કુટ્ટિકવિવિરચિતં
સ્તોત્રસમુચ્ચયઃ ૨ (૬૦)

The Turagashataka (60) also called Dhatishataka
is by Vanchesvara (I) or Vanchanatha, popularly
known its Kuttikavi. It is actually a eulogy on
Lord Ranganatha at Srirangam in perfect Kavya
style with fine imagery.

The poet describes the Lord mounting on a horse, perhaps during a festival procession.

Proofread by Rajesh Thyagarajan

*Turaga Shatakam*

pdf was typeset on October 31, 2023

Please send corrections to *sanskrit@cheerful.com*